तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् |
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् || १||

को न्वस्मिन्साम्प्रतं लोके गुणवान्कश्च वीर्यवान् |
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः || २||

चारित्रेण च को युक्तः सर्वभूतेषु को हितः |
विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः || ३||

आत्मवान्को जितक्रोधो मतिमान्कोऽनसूयकः |
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे || ४||

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे |
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् || ५||

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः |
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् || ६||

बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः |
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः || ७||

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः |
नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी || ८||

बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्शत्रुनिबर्हणः |
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः || ९||

महोरस्को महेष्वासो गूढजत्रुररिन्दमः |
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः || १०||

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् |
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्शुभलक्षणः || ११||

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः |
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् || १२||

रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता |
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः || १३||

सर्वशास्त्रार्थतत्त्वज्ञो स्मृतिमान्प्रतिभानवान् |
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः || १४||

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः |
आर्यः सर्वसमश्चैव सदैकप्रियदर्शनः || १५||

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः |
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव || १६||

विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः |
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः || १७||

धनदेन समस्त्यागे सत्ये धर्म इवापरः |
तमेवङ्गुणसम्पन्नं रामं सत्यपराक्रमम् || १८||

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् |
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः || १९||

तस्याभिषेकसम्भारान्दृष्ट्वा भार्याथ कैकयी |
पूर्वं दत्तवरा देवी वरमेनमयाचत |
विवासनं च रामस्य भरतस्याभिषेचनम् || २०||

स सत्यवचनाद्राजा धर्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ॥ २१॥

स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् ॥ २२॥

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः ॥ २३॥

सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ॥ २४॥

पौरैरनुगतो दूरं पित्रा दशरथेन च ।
शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ॥ २५॥

ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ।
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ॥ २६॥

रम्यमावसथं कृत्वा रममाणा वने त्रयः ।
देवगन्धर्वसङ्काशास्तत्र ते न्यवसन्सुखम् ॥ २७॥

चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ।
राजा दशरथः स्वर्गं जगाम विलपन्सुतम् ॥ २८॥

मृते तु तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः ।
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ॥ २९॥

पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ॥ ३०॥

स काममनवाप्यैव रामपादावुपस्पृशन् ।
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ॥ ३१॥

रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रे दण्डकान्प्रविवेश ह ॥ ३२॥

विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्य भ्रातरं तथा ॥ ३३॥

अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ।
खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ ॥ ३४॥

वसतस्तस्य रामस्य वने वनचरैः सह ।
ऋषयोऽभ्यागमन्सर्वे वधायासुरराक्षसाम् ॥ ३५॥

तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ३६॥

ततः शूर्पणखावाक्याादुद्युक्तान्सर्वराक्षसान् ।
खरं त्रिशिरसं चैव दूषणं चैव राक्षसं ॥ ३७॥

निजघान रणे रामस्तेषां चैव पदानुगान् ।
रक्षसां निहतान्यासन्सहस्राणि चतुर्दश ॥ ३८॥

ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः ।
सहायं वरयामास मारीचं नाम राक्षसं ॥ ३९॥

वार्यमाणः सुबहुशो मारीचेन स रावणः ।
न विरोधो बलवता क्षमो रावण तेन ते ॥ ४०॥

अनादृत्य तु तद्वाक्यं रावणः कालचोदितः |
जगाम सहमरीचस्तस्याश्रमपदं तदा || ४१||

तेन मायाविना दूरमपवाह्य नृपात्मजौ |
जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् || ४२||

गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् |
राघवः शोकसन्तप्तो विललापाकुलेन्द्रियः || ४३||

ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् |
मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह || ४४||

कबन्धं नाम रूपेण विकृतं घोरदर्शनम् |
तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः || ४५||

स चास्य कथयामास शबरीं धर्मचारिणीम् |
श्रमणीं धर्मनिपुणामभिगच्छेति राघव |
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः || ४६||

शबर्या पूजितः सम्यग्रामो दशरथात्मजः |
पम्पातीरे हनुमता सङ्गतो वानरेण ह || ४७||

हनुमद्वचनाच्चैव सुग्रीवेण समागतः |
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः || ४८||

ततो वानरराजेन वैरानुकथनं प्रति |
रामायावेदितं सर्वं प्रणयाद्दुःखितेन च |
वालिनश्च बलं तत्र कथयामास वानरः || ४९||

प्रतिज्ञातं च रामेण तदा वालिवधं प्रति |
सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे || ५०||

राघवः प्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् |
पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् || ५१||

बिभेद च पुनः सालान्सप्तैकेन महेषुणा |
गिरिं रसातलं चैव जनयन्प्रत्ययं तदा || ५२||

ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः |
किष्किन्धां रामसहितो जगाम च गुहां तदा || ५३||

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः |
तेन नादेन महता निर्जगाम हरीश्वरः || ५४||

ततः सुग्रीववचनाद्धत्वा वालिनमाहवे |
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् || ५५||

स च सर्वान्समानीय वानरान्वानरर्षभः |
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् || ५६||

ततो गृध्रस्य वचनात्सम्पातेर्हनुमान्बली |
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् || ५७||

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् |
ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् || ५८||

निवेदयित्वाभिज्ञानं प्रवृत्तिं च निवेद्य च |
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् || ५९||

पञ्च सेनाग्रगान्हत्वा सप्त मन्त्रिसुतानपि |
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् || ६०||

अस्त्रेणोन्मुहमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन्राक्षसान्वीरो यन्त्रिणस्तान्यदृच्छया ॥ ६१॥

ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ ६२॥

सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ ६३॥

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।
समुद्रं क्षोभयामास शरैरादित्यसंनिभैः ॥ ६४॥

दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ ६५॥

तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
अभ्यषिञ्चत्स लङ्कायां राक्षसेन्द्रं विभीषणम् ॥ ६६॥

कर्मणा तेन महता त्रैलोक्यं सचराचरम् ।
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ॥ ६७॥

तथा परमसन्तुष्टैः पूजितः सर्वदैवतैः ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ६८॥

देवताभ्यो वरान्प्राप्य समुत्थाप्य च वानरान् ।
पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥ ६९॥

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ७०॥

प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ।
निरायमो अरोगश्च दुर्भिक्षभयवर्जितः ॥ ७१॥

न पुत्रमरणं के चिद्द्रक्ष्यन्ति पुरुषाः क्व चित् ।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥ ७२॥

न वातजं भयं किं चिन्नाप्सु मज्जन्ति जन्तवः ।
न चाग्निजं भयं किं चिद्यथा कृतयुगे तथा ॥ ७३॥

अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ।
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ॥ ७४॥

राजवंशाञ्शतगुणान्स्थापयिष्यति राघवः ।
चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति ॥
७५॥

दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥ ७६॥

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ ७७॥

एतदाख्यानमायुष्यं पठन्रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ७८॥

पठन्द्विजो वागृषभत्वमीयात्
स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयाज्
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥ ७९॥